Sri Dharma Shastha Sahasranama Stotram

Nyāsa

अस्य श्री हरिहरपुत्र सहस्रनाम स्तोत्र महामन्त्रस्य – अर्धनारीश्वर ऋषिः – अनुष्टुप् छन्दः – श्रीहरिहरपुत्रो देवता – ह्रां बीजं – ह्रीं शक्तिः – ह्रूं कीलकं – श्रीहरिहरपुत्रप्रसादसिद्ध्यर्थे सहस्रनामजपे विनियोगः ॥

करन्यासः
ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । ह्रूं मध्यमाभ्यां नमः ।
ह्रैं अनामिकाभ्यां नमः । ह्रौं कनिष्ठाभ्यां नमः । ह्रः करतलकरपृष्ठाभ्यां नमः ॥

अङ्गन्यासः
ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् ।
ह्रैं कवचाय हुम् । ह्रौं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् ।
भूर्भुवस्सुवरोम् इति दिग्बन्धः ॥

Dhyānam

आश्यामकोमलविशालतनुं विचित्र-
वासोवसानम् अरुणोत्पलदामहस्तम् ।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं

शास्तारमिष्टवरदं शरणं प्रपद्ये ॥

Stotram

शिवपुत्रो महातेजा शिवकार्यधुरन्धरः ।
शिवप्रदः शिवज्ञानी शैवधर्मसुरक्षितः ॥ १॥
शङ्खधारी सुराध्यक्षः चंद्रमौलीः सुरोत्तमः ।
कामेशः कामतेजस्वी कामादिफलसंयुतः ॥ २॥
कल्याणः कोमलाङ्गश्च कल्याणफलदायकंः ।
करुणाब्धिः कर्मदक्षः करुणारससागरः ॥ ३॥
जगत्प्रियो जगद्रक्षो जगदानन्ददायकः ।
जयादिशक्तिसंसेव्यो जनाह्लादो जिगीषुकः ॥ ४॥
जितेन्द्रियो जितक्रोधो जितदेवारिसंघकः ।
जैमिन्यादि मुनिस्सेव्यो जरामरणनाशकः ॥ ५॥
जनार्दनसुतो ज्येष्ठो ज्येष्ठादिगणसेवितः ।
जन्महीनो जितामोहो जनकेनाऽभिपूजितः ॥ ६॥
परमेष्ठी पशुपतिः पङ्कजासनपूजितः ।
पुरहंता पुरत्राता परमैश्वर्यदायकः ॥ ७॥
पवनादिसुरैस्सेव्यः पञ्चब्रह्मपरायणः ।
पार्वती तनयो ब्रह्मा परानन्दः परात्परः ॥ ८॥
ब्रह्मिष्ठो ज्ञाननिरतः गुणागुणनिरूपकः ।
गुणाध्यक्षो गुणनिधिः गोपालेनाभिपूजितः ॥ ९॥
गोरक्षको गोधनश्च गजारूढो गजप्रियः ।
गजग्रीवो गजस्कन्धो गभस्तिः गोपतिः प्रभुः ॥ १०॥

ग्रामपालो गजाध्यक्षो दिग्गजेनाऽभि पूजितः ।
गणाध्यक्षो गणपतिः गवांपतिः (र) अहर्पतिः ॥ ११॥
जटाधरो जलनिभो जैमिन्यैरभि पूजितः ।
जलन्धर निहन्ता च शोणाक्षः शोणवाससः ॥ १२॥
सुराधिपो शोकहन्ता शोभाक्षस्सूर्यतेजसः ।
सुरार्चितस्सुरैर्वन्द्यः शोणाङ्गः शाल्मलीपतिः ॥ १३॥
सज्योतिः शरवीरघ्नः शरश्चन्द्रनिभाननः ।
सनकादिमुनिध्येयः सर्वज्ञानप्रदो विभुः ॥ १४॥
हलायुधो हंसनिभो हाहाहूहू मुखस्तुतः ।
हरिर्ह रप्रियो हंसो हर्यक्षासनतत्परः ॥ १५॥
पावनः पावकनिभो भक्तपापविनाशनः ।
भसिताङ्गो भयत्राता भानुमान् भयनाशनः ॥ १६॥
त्रिपुण्ड्रधारी त्रिनयनः त्रिपुण्ड्राङ्कितमस्तकः ।
त्रिपुरघ्नो देववरो देवारिकुलसंहृतः ॥ १७॥
देवसेनाधिपस्तेजः तेजोराशिर्दशाननः ।
दारुणो दोषहन्ता च दोर्दण्डो दण्डनायकः ॥ १८॥
धनुष्पाणिः धराध्यक्षो धनिको धर्मवत्सलः ।
धर्मज्ञो धर्मनिरतो धनुश्शास्त्रपरायणः ॥ १९॥
स्थूलकर्णः स्थूलतनुः स्थूलाक्षो स्थूलबाहुकः ।
तनूत्तमः तनुत्राणः तारकस्तेजसांपतिः ॥ २०॥
योगीश्वरो योगनिधिः योगिनो योगसंस्थितः ।
मन्दारवाटिको मत्तो मलयाचलवासभूः ॥ २१॥
मन्दारकुसुमप्रख्यो मंदमारुतसेवितः ।
महाभासो महावक्षा मनोहरमदार्चितः ॥ २२॥

महोन्नतो महाकायो महानेत्रो महाहनुः ।
मरूत्पूज्यो मानधनो मोहनो मोक्षदायकः ॥ २३॥
मित्रो मेवा महौजस्वी महावर्षप्रदायकः ।
भाषको भाष्यशास्त्रज्ञो भानुमत् भानुतेजसः ॥ २४॥
भवानीपुत्रको भिषग् भवतारणकारणः ।
नीलाम्बरो नीलनिभो नीलग्रीवो निरञ्जनः ॥ २५॥
नेत्रत्रयो निषादज्ञो नानारत्नोपशोभितः ।
रत्नप्रभो रमापुत्रो रमया परितोषितः ॥ २६॥
राजसेव्यो राजधनो रणदोर्दण्डमण्डितः ।
रमणो रेणुकासेव्यो रजनीचरदारणः ॥ २७॥
ईशान इभराट् सेव्य ईषणात्रयनाशनः ।
इडावासो हेमनिभो हैमप्राकारशोभितः ॥ २८॥
हरिहरात्मजो हंसो हयग्रीवो हयप्रियः ।
हाटकस्फटिकप्रख्यो हंसारूढेन सेवितः ॥ २९॥
वनवासो वनाध्यक्षो वामदेवो वराननः ।
वैवस्वतपतिर्विष्णुः विराड्रूपो विशालवान् ॥ ३०॥
वेणुनादो वरग्रीवो वराभयकरान्वितः ।
वर्चस्वी विपुलग्रीवो विपुलाक्षो विनोदवान् ॥ ३१॥
वैणव वनवासश्च वामदेवेन सेवितः ।
वेत्रहस्तो वेषनिधिः वंशदेवो वराङ्गकः ॥ ३२॥
ह्रीङ्कारो ह्रीं मना हृषो हिरण्यो हेमसंभवः ।
हुताशो हुतनिष्पन्नो हुंकारकृतिसुप्रभुः ॥ ३३॥
हव्यवाहो हव्यकरश्च अट्टहासोऽपराहतः ।
अणुरूपोरूपकरश्च अजरोऽतनुरूपकः ॥ ३४॥

हंसमंत्रश्च हुतभुग् हेमाम्बरसुलक्षणः ।
नीपप्रियो नीलवासाः निधिपालो निरातपः ॥ ३५॥
क्रोडहस्तस्तपस्त्राता तपोरक्षस्तपाह्वयः ।
मूर्धाभिषक्तो मानधनो मंत्ररूपो मृडो मनुः ॥ ३६॥
मेधावी मेधसो मुष्णुः मकरो मकरालयः ।
मार्ताण्डो मञ्जुकेशश्च मासपालो महौषधिः ॥ ३७॥
श्रोत्रियः शोभमानश्च सविता सर्वदेशिकः ।
चन्द्रहासः शमः शक्तः शशिभासः समाधिकः ॥ ३८॥
सुदन्तः सुकपोलश्च षड्वर्णस्संपदोऽधिपः ।
गरलः कालकण्ठश्च गोनेता गोमुरव प्रभुः ॥ ३९॥
कौशिकः कालदेवश्च क्रोशकः क्रौञ्चभेदकः ।
क्रियाकरः कृपालुश्च करवीरकरोरुहः ॥ ४०॥
कन्दर्पदर्पहारीच कामदाता कपालकः ।
कैलासवासो वरदो विरोचनो विभावसुः ॥ ४१॥
बभृवाहो बलाध्यक्षो फणामणि विभूषणः ।
सुन्दरः सुमुखः स्वच्छः सभासञ्च सभाकरः ॥ ४२॥
शरानिवृत्तः शङ्काप्तः शरणागतपालकः ।
तीक्ष्णदंष्ट्रो दीर्घजिह्वः पिङ्गलाक्षः पिशाचहा ॥ ४३॥
अभेद्यश्चाङ्गदाड्यश्च भोजपालेऽथ भूपतिः ।
गृध्रनासोऽविषह्यश्च दिग्देहो दैन्यदाहकः ॥ ४४॥
बडवापूरितमुखो व्यापको विषमोचकः ।
हसन्तः समरकृद्धः पुङ्गवः पङ्कजासनः ॥ ४५॥
विश्वदर्पो निश्चिताज्ञो नागाभरणभूषितः ।
भरतो भैरवाकारो भरणो वामनक्रियः ॥ ४६॥

सिंहास्यः सिंहरूपश्च सेनापतिः सकारकः ।
सनातनः सिद्धरुचिः सिद्धधर्मपरायणः ॥ ४७॥
आदित्यरूप आपत्घ्नः अमृतांभोधिवासभूः ।
युवराजो योगिवर्य उषस्तेजा उडुप्रभः ॥ ४८॥
देवादिदेवो दैवज्ञः ताम्रोष्ठस्ताम्रलोचनः ।
पिङ्गलाक्षः पिञ्छचूडः फणामणि विभूषितः ॥ ४९॥
भुजङ्गभूषणो भोगो भोगानन्दकरोऽभयः ।
पञ्चहस्तेन संपूज्यः पञ्चबाणेन सेवितः ॥ ५०॥
भवः शर्वो भानुमयः प्राजापत्यस्वरूपकः ।
स्वच्छन्तः छन्दः शास्त्रज्ञो दान्तो देवमनुप्रभुः ॥ ५१॥
दशभुक्च दलाध्यक्षो दानवानां विनाशनः ।
सहस्त्राक्षः शतनिष्पन्नः शतानन्दः समागमः ॥ ५२॥
गरुडाद्रिवासो गंभीरो गन्धग्राहो गणेश्वरः ।
गण्डकावासो गोमेधो गोकुलैः परिवारितः ॥ ५३॥
परिवेषः पदज्ञानी प्रियङ्गुड्द्रुमवासकः ।
गुहावासो गुरुवरो वन्दनीयो वदान्यकः ॥ ५४॥
वृत्ताकारो वेणुपाणिः वीणादण्डधरो हरः ।
हैमिल्यो होतृसुभगो हौत्रज्ञश्चौजसां पतिः ॥ ५५॥
पवमानः प्रजातन्तुप्रदो दण्डविनाशनः ।
निमील्यो निमिषार्धज्ञो निमिषाकारकारणः ॥ ५६॥
लिगुडाभो लिडाकारो लक्ष्मीवन्द्यो वरप्रभुः ।
इडाज्ञः पिङ्गलावासः सुषुम्नामध्यसंभवः ॥ ५७॥
भिक्षाटनो भीमवर्चा वरकीर्तिः सभेश्वरः ।
वाचातीतो वरनिधिः परिवेत्ता प्रमाणकः ॥ ५८॥

अप्रमेयो ऽनिरुद्धश्च अनन्तादित्यवर्चसः ।

वेषप्रियो विषग्राहो वरदानकरोत्तमः ॥ ५९॥

विपिनो वेदसारश्च वेदान्तैः परितोषितः ।

वक्रागमो वक्रवाचो बलदाता विमानवान् ॥ ६०॥

वज्रकान्तो वंशवरो वटुरक्षा विशारदः ।

वप्रकीडो विप्रपूज्यो वेलाराशिश्चलालकः ॥ ६१॥

क्रोडास्यः क्रोडनेत्रश्च कोलाहलः कपालभृत् ।

कञ्जरीटो मञ्जुवासाः क्रियमाणः क्रियाप्रदः ॥ ६२॥

क्रीडानाथः कीलहस्तः क्रोशमानः कुलान्तकः ।

खनको होतृभागश्च खवासः खचरः खगः ॥ ६३॥

गणको गुणर्निदुष्टो गुणत्यागः कुशाधिपः ।

पाटलः पत्रधारी चपालाशः (पलाशः) पुत्रवर्धनः ॥ ६४॥

पितृसच्चरितः पेष्ठः पापभस्मा पुनः शुचिः ।

फालनेत्रः फुल्लकेशः फुल्लकल्हारभूषितः ॥ ६५॥

फणिसेव्यः पट्टभद्रः पटुर्वाग्मी वयोधिकः ।

चोरनाट्यः चोरवेषः चोरघ्नः चौर्यवर्धनः ॥ ६६॥

चञ्चलाक्षश्चामरको मरीचिर्मन्दगामिकः ।

मृडाभो मेषवाहश्च मैथिल्यो मोचको मनः ॥ ६७॥

मनुरूपो मन्त्रदेवो मन्त्रराशिर्महादृढः ।

स्थूपिज्ञो धनदाता च देववन्द्यश्च तारणः ॥ ६८॥

यज्ञप्रियो यमाध्यक्षो इभक्रीड इभेक्षणः ।

दधिप्रियो दुराधर्षो दारुपालो दनूजहा ॥ ६९॥

दामोदरो दामधरो दक्षिणामूर्तिरूपकः ।

शचीपूज्यः शङ्खकर्णः चंद्रचूडो मनुप्रियः ॥ ७०॥

गुडरूपो गुडाकेशः कुलधर्मपरायणः ।

कालकण्ठो गाढगात्रो(नेत्रो) गोत्ररूपःकुलेश्वरः ॥ ७१॥

आनन्दभैरवाराध्यो हयमेधफलप्रदः ।

दध्यन्नासक्तहृदयो गुडान्नप्रीतमानसः ॥ ७२॥

घृतान्नासक्तहृदयो गौराङ्गो गर्वभञ्जकः ।

गणेशपूज्यो गगनो (गहनो) गणानांपतिगर्जितः ॥ ७३॥

चद्महीनः शशिरदः शत्रूणांपतिरङ्गिराः ।

चराचरमयः शान्तः शरभेशः शतातपः ॥ ७४॥

वीराराध्यो वक्रगमो वेदाङ्गो वेदसञ्चरः ।

पर्वतारोहणः पूषा परमेशः प्रजापतिः ॥ ७५॥

भावज्ञो भवरोगघ्नो भवसागरतारणः ।

चिदग्निदेहश्चिद्रूपः चिदानन्दश्चिदाकृतिः ॥ ७६॥

नाट्यप्रियो नरपतिः नरनारायणार्चितः ।

निषादराजो नीहारो (मिहिरो) नेष्टा निष्ठुरभाषणः ॥ ७७॥

निम्नप्रियो नीलनेत्रो नीलाङ्गो नीलकेशकः ।

सिंहाक्षः सर्वविघ्नेशः सामवेदपरायणः ॥ ७८॥

सनकादिमुनिध्येयः (समाराध्यः) शर्वरीशः षडाननः ।

सुरूपः सुलभः स्वर्गः शचीनाथेन पूजितः ॥ ७९॥

काकिनः कामदहनो दग्धपापो धराधिपः ।

दामग्रन्थी शतस्त्रीशः तन्त्रीपालश्च तारकः ॥ ८०॥

ताम्राक्षः तीक्ष्णदंष्ट्रश्च तिलभोज्यः तिलोदरः ।

माण्डुकर्णो मृडाधीशो मेरुवर्णा महोदरः ॥ ८१॥

मार्ताण्डभैरवाराध्यो मणिरूपो मरुद्वहः ।

माषप्रियो मधुपानो मृणालो मोहिनीपतिः ॥ ८२॥

महाकामेशनयनो माधवो मदगर्वितः ।
मूलाधारांबुजावासो मूलविद्यास्वरूपकः ॥ ८३॥
स्वादिष्ठानमयः स्वस्थः स्वस्तिवाक्यः स्रुवायुधः ।
मणिपूराब्जनिलयो महाभैरवपूजितः ॥ ८४॥
अनाहताब्जरसिको ह्रींकाररसपेशलः ।
भ्रूमध्यवासो भ्रूकान्तो भरद्वाजेन पूजितः ॥ ८५॥
सहस्रारांबुजावासः सविता सामवाचकः ।
मुकुन्दश्च गुणातीतो गुणपूज्यो गुणाश्रयः ॥ ८६॥
धन्यश्च धनभृद्दाहो धनदानकरांबुजः ।
महाशयो महातीतो मायाहीनो मदर्चितः ॥ ८७॥
माठरो मोक्षफलदो मद्वैरिकुलनाशनः ।
पिङ्गलः पिञ्छचूडश्च पिशिताशपवित्रकः ॥ ८८॥
पायसान्नप्रियः पर्वपक्षमासविभाजकः ।
वज्रभूषो वज्रकायो विरिञ्चो वरवक्षसः ॥ ८९॥
विज्ञानकलिकाबृन्दो विश्वरूपप्रदर्शकः ।
डंभघ्नो दमघोषघ्नो दासपालः तपौजसः ॥ ९०॥
द्रोणकुंभाभिषिक्तश्च द्रोहिनाशस्तपातुरः ।
महाधीरेन्द्रवरदो महासंसारनाशनः ॥ ९१॥
लाकिनी हाकिनी लब्धो लवणांभोधितारणः ।
काकिनः कालपाशघ्नः कर्मबन्धविमोचकः ॥ ९२॥
मोचको मोहनिर्भिन्नो भगाराध्यो बृहत्तनुः ।
अक्षयोऽक्रूरवरदो वक्रागमविनाशनः ॥ ९३॥
डाकिनः सूर्यतेजस्वी सर्वभूषश्च सद्गुरुः ।
स्वतन्त्रः सर्वतन्त्रेशो दक्षिणामूर्तिरूपकः ॥ ९४॥

चित्सदानन्दकलिकः प्रेमरूपः प्रियङ्करः ।
मिथ्याजगदधिष्ठानो मुक्तिदो मुक्तिरूपकः ॥ ९५॥
मुमुक्षुः कर्मफलदो मार्गदक्षोऽथ कार्मणः ।
महाबुद्धो महाशुद्धः शुकवर्णः शुकप्रियः ॥ ९६॥
सोमप्रियः सुरप्रितः पर्वाराधनतत्परः ।
अजपो जनहंसश्च (फल) हलपाणिप्रपूजितः ॥ ९७॥
अर्चितो वर्चसो वाग्मी वीरवेषो विधुप्रियः ।
लास्यप्रियो लयकरो लाभालाभविवर्जितः ॥ ९८॥
पञ्चाननः पञ्चगुरुः पञ्चयज्ञफलप्रदः ।
परशुहस्तः पावकेशः पर्जन्यसमगर्जितः ॥ ९९॥
पापारिः परमोदारः प्रजेश (पङ्कनाशनः) पङ्कजाशनः ।
नष्टकर्मा नष्टवैर इष्टसिद्धिप्रदायकः ॥ १००॥
नागाधीशो नष्टपापः इष्टनामविधायकः ।
सामरस्योऽप्रमेयश्च पाषण्डी पर्वतप्रियः ॥ १०१॥
पञ्चकृत्यः परोपेतः पञ्चपञ्चातिशायिकः ।
पद्माक्षः पद्मवदनः पावकाभः प्रियंकरः ॥ १०२॥
कार्त्तस्वराङ्गो गौराङ्गो गौरीपुत्रो गणेश्वरः ।
आश्लिष्टः श्लिष्टवपुषः शीतांशुःशुभदीधितिः ॥ १०३॥
दक्षध्वंसो दक्षकरो वरः कात्यायनीसुतः ।
सुमुखो मार्गणो गर्भो गर्वभङ्गः कुशासनः ॥ १०४॥
कुलपालपतिः श्रेष्ठः पवमानः प्रजाधिपः ।
दर्शप्रियो दर्विकारो दीर्घकायो दिवाकरः ॥ १०५॥
भेरीनादप्रियो बृन्दो बृहत्सेनो सुपालकः ।
सुब्रह्मा ब्रह्मरसिको रसज्ञो रजताद्रिभाः ॥ १०६॥

तिमिरघ्नो मिहिराभो महानीलसमप्रभः ।

श्रीचन्दनविलिप्ताङ्गः श्रीपुत्रः श्रीतरुप्रियः ॥ १०७॥

लाक्षावर्णो लसकर्णो रजनीध्वंसिसन्निभः ।

बिन्दुप्रियोऽम्बिकापुत्रो बैन्दवो बलनायकः ॥ १०८॥

आपन्नतारकस्तप्तः तप्तकृज्छ्रफलप्रदः ।

मरुदृधो महाखर्वः चिरावासः शिखिप्रियः ॥ १०९॥

आयुष्माननघो दूत आयुर्वेदपरायणः ।

हंसश्च परमोहंसः चावधूताश्रमप्रियः ॥ ११०॥

आशुवेगोऽश्वहृदयो हयधैर्य (मेध) फलप्रदः ।

सुमुखो दुर्मुखो विघ्नोऽविघ्नो विघ्नविनाशनः ॥ १११॥

आर्यानाथोऽर्यमाभासः फल्गुनः पार्वतीप्रियः (पाललोजनः) ।

अरातिघ्नो घनग्रीवो ग्रीष्मसूर्यसमप्रभः ॥ ११२॥

किरीटी कल्पशास्त्रज्ञः कल्पानलविधायकः ।

ज्ञानविज्ञानफलदो विरिञ्चारिविनाशनः ॥ ११३॥

वीरमार्ताण्डवरदो वीरबाहुश्च पूर्वजः ।

वीरसिंहासनो विज्ञो वीरकार्योऽस्त्रदानवः (दायकः) ॥ ११४॥

नरवीरसुहृद्भ्राता नागरत्न विभूषितः ।

वाचस्पतिः पुरारातिः संवर्तः समरेश्वरः ॥ ११५॥

उरुवाग्म्यप्युमापुत्रः उडुलोकसुरक्षकः ।

श्रृङ्गाररससंपूर्णः सिन्दूरतिलकाङ्कितः ॥ ११६॥

कुङ्कुमाङ्कितसर्वाङ्गः कालिकेयविनाशनः ।

मत्तनागप्रियो नीतो नागगन्धर्वपूजितः ॥ ११७॥

सुस्वप्नबोधको बोधो गौरी (ळी) दुस्स्वप्ननाशनः ।

चिन्ताराशिपरिध्वंसी चिन्तामणिविभूषितः ॥ ११८॥

(चराचर) चलाचलजगत्स्रष्टा चलत्कुण्डलकर्णयुग् ।
मुकुरास्यो मूलनिधिः निधिद्वयनिषेवितः ॥ ११९॥
नीराजनप्रीतमना नीरनेत्रो नयप्रदः ।
केदारेशः किरातश्च कालात्मा कल्पविग्रहः ॥ १२०॥
कल्पान्तभैरवाराध्यः काकपत्रशरायुधः ।
कलाकाष्टास्वरूपश्च ऋतुवर्षादिमासवान् ॥ १२१॥
दिनेशमण्डलावासो वासवेन प्रपूजितः ।
बहुलस्तम्बकर्मज्ञः पञ्चाशद्वर्णरूपकः ॥ १२२॥
चिन्ताहीनः चिदाक्रान्तः चारुपालः बलायुधः ।
बन्धूककुसुमप्रख्यः परगर्वविभञ्जनः ॥ १२३॥
विद्वत्तमो विराधघ्नः सचित्रश्चित्रकर्मकः ।
सङ्गीतलोलुपमनाः स्निग्धगंभीरगर्जितः ॥ १२४॥
तुङ्गवक्त्रः स्तवरसः चाभ्राभो भ्रमरेक्षणः ।
लीलाकमलहस्ताब्जो बालकुन्दविभूषितः ॥ १२५॥
लोध्रप्रसवशुद्धाभः शिरीषकुसुमप्रियः ।
त्रासत्राणकरस्तत्वः तत्ववाक्यार्थबोधकः ॥ १२६॥
वर्षीयांश्च विधातव्यो वेदान्तप्रतिपादकः ।
मूलभूतो मूलतत्वो मूलकारणविग्रहः ॥ १२७॥
आदिनाथोऽक्षयफलपाणिर्जन्मपराजितः ।
गानप्रियः गानलोलः महेशो विज्ञमानसः ॥ १२८॥
गिरिजास्तन्यरसिको गिरिराजवरसुतः ।
पीयूषकुम्भहस्ताब्जः पाशत्यागश्चिरन्तनः ॥ १२९॥
सुधालालसवक्त्राब्जः सुरद्रुमफलेप्सितः ।
रत्नहाटकभूषाङ्गो रावणादिप्रपूजितः ॥ १३०॥

कनत्कालेशसुप्रीतः क्रौञ्चगर्वविनाशनः ।
अशेषजनसम्मोहः आयुर्विद्याफलप्रदः ॥ १३१॥
अवबद्धदुकूलाङ्गो हारालंकृतकन्धरः ।
केतकीकुसुमप्रीतः कलभैः परिवारितः ॥ १३२॥
केकाप्रियः कार्तिकेयः सारङ्गनिनदप्रियः ।
चातकालापसन्तुष्टः चमरीमृगसेवितः ॥ १३३॥
आम्रकूटाद्रिसञ्चारः आम्नायफलदायकः ।
अक्षसूत्रधृतपाणिः अक्षिरोगविनाशनः ॥ १३४॥
मुकुन्दपूज्यो मोहाङ्गो मुनिमानसतोषितः ।
तैलाभिषिक्तसुशिरसः तर्जनीमुद्रदर्शनः ॥ १३५॥
तटातकामनः प्रीतः तमोगुणविनाशनः ।
अनामयो ह्यनादर्श अर्जुनाभहुतप्रियः ॥ १३६॥
षाङ्गुण्यपरिसंपूर्णः सप्ताश्वादिग्रहैः स्तुतः ।
वीतशोकः प्रसादज्ञः सप्तप्राणवरप्रदः ॥ १३७॥
सप्तार्चिश्च त्रिनयनः त्रिवेणिफलदायकः ।
कृष्णवर्मा वेदमुखो दारुमण्डलमध्यगः ॥ १३८॥
वीरनूपुरपादाब्जो वीरकङ्कणपाणिमान् ।
विश्वमूर्तिः शुद्धमुखः शुद्धभस्मानुलेपनः ॥ १३९॥
शुम्भध्वंसिनिसंपूज्यो रक्तकुंभकुलान्तकः ।
निषादिस्वरप्रीतो नमस्कारफलप्रदः ॥ १४०॥
भक्तारि पञ्चतादायी सज्जीकृतशरायुधः ।
अभयंकरमंत्रज्ञः कुब्जिकामंत्रविग्रहः ॥ १४१॥
धूम्रास्त्र उग्र (धूम्र) तेजस्वी दशकण्ठविनाशनः ।
आशुगायुधहस्ताब्जो गदायुधकरांबुजः ॥ १४२॥

पाशायुधसुपाणिश्च कपालायुधसद्भुजः ।

सहस्रमूर्धवदनो सहस्रद्वयलोचनः ॥ १४३॥

नानाहेति (धर) र्धनुष्पाणिः नानास्थिभूषणप्रियः ।

आश्यामकोमलतनुः आरक्तापाङ्गलोचनः ॥ १४४॥

द्वादशाहक्रतुप्रीतः पौण्डरीकफलप्रदः ।

आप्तोर्यामक्रतुमयः चायनादि फलप्रदः ॥ १४५॥

पशुबन्धफलदाता वाजपेयात्मदैवतम् ।

आब्रह्मकीडजननावनात्मा चंपकप्रियः ॥ १४६॥

पशुपाशविभागज्ञः पतिज्ञानप्रदायकः ।

कल्पेश्वरः कल्पवर्यो जातवेदः प्रभाकरः ॥ १४७॥

कुंभीश्वरः कुंभपाणिः कुंकुमाक्त ललाटकः ।

शिलीध्रपत्रसंकाशः सिंहवक्त्रप्रमर्दनः ॥ १४८॥

कोकिलध्वनिताकर्णी कालनाशनतत्परः ।

नैयायिकमतध्नश्च बौद्धसङ्घविनाशनः ॥ १४९॥

हेमाब्जादृतपाणिश्च होमसंतुष्टमानसः ।

पितृयज्ञस्यफलदः पितेवजनरक्षकः ॥ १५०॥

पदातिकर्मनिरतः पृषदाज्यप्रदायकः ।

महासुरवधोद्युक्तः स्वस्त्र प्रत्यस्त्रवर्षकः ॥ १५१॥

महावर्षतिरोधानो नागादृत करांबुजः ।

नमः स्वाहा वषट् वौषट् पल्लवप्रतिपादकः ॥ १५२॥

मिहिरसदृशग्रीवो मिहिरसदृशस्तवः ।

तंत्रीवादन हस्ताग्रः संगीतप्रियमानसः ॥ १५३॥

चिदंशमुकुरावासो माणिकूटाद्रि संचरः ।

लीलासंचारतनुकः लिङ्गशास्त्रप्रवर्त्तकः ॥ १५४॥

राकेन्दुद्युतिसंपन्नः यागकर्मफलप्रदः ।

मैनाकगिरिसञ्चारः मधुवंशविनाशनः ।

तालखण्डपुरावासः तमालनिभतेजसः (तमालसदृशप्रभः) ॥ १५५॥

Ayyappa Samaaj · ayyappasamaaj.org/interactive/sahasranama-yatra/ · from the reviewed text of the Sahasranama Yatra (Devanagari)